प्रश्नपत्र-2021-22

द्वितीयं सत्रम्

कक्षा-नवमी

संस्कृतम्

समयः- होराद्वयम् सम्पूर्णाङ्काः - 40

सामान्यनिर्देशाः -

1) अस्मिन् प्रश्नपत्रे 9 प्रश्नाः सन्ति।

2) प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया ।

3) उत्तराणि संस्कृतेन लेखनीयानि।

वर्णनात्मकाः प्रश्नाः 40 अङ्काः

| | | |
|---|---|---|
| | अपठितावबोधनम् | |
| 1 | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - | 10 |
| | शिक्षायाः महत्त्वं सर्वेषां एव विदितम्।शिक्षामन्तरेण केषामपि सत्कार्यप्रवृत्तिः सम्भवति।जनः कर्तव्याकर्तव्ययो विवेकं कर्तुं शिक्षया एव समर्थो भवति।शिक्षां विना जनोऽन्धवत् एव कार्येषु प्रवर्तते।शिक्षाविहीनो मूर्खः नाद्रियते लोकैः। धनार्जनाय न क्षमते कुटुम्बभरणाय स्वोदरदरीपूर्त्तये वा। शिक्षाविहीनः नरः पशुतुल्यो भवति।वस्तुतः मनुष्यस्य जीवनं शिक्षां विना निरर्थकमेव अस्ति।मनुष्यस्य शोभा तु शिक्षया एव भवति।शिक्षा मनुष्यस्य रक्षा पदे-पदे माता इव च हितकार्ये नियुक्तं पिता इव करोति। | |
| 1 | एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) | 2 |
| | 1) शिक्षाविहीनः नरः कीदृशः भवति?<br>2) सत्कार्यप्रवृतिः कथं भवति?<br>3) कस्य जीवनं शिक्षां विना निरर्थकमेव अस्ति ? | |
| 2 | पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) | 4 |
| | 1) मूर्खः कैः नाद्रियते?<br>2) जनः शिक्षया किं कर्तुम् समर्थः भवति?<br>3) विद्या पितेव किं करोति? | |
| 3 | अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत - | 1 |
| 4 | यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) | 3 |
| | 1) अनुच्छेदे 'सार्थकम्' इति पदस्य विलोमपदं किं प्रयुक्तम् ?<br>2) 'शिक्षाविहीनः नरः पशुतुल्यो भवति।'अत्र कर्तृपदम् किम्?<br>3) 'शिक्षाविहीनो' इति विशेषणपदस्य विशेष्यपदम् किम् अस्ति?<br>4) 'संसारैः' इति पदस्य पर्यायपदम् अनुच्छेदे किम् अस्ति? | |
| | रचनात्मकं कार्यम् | |

| | | |
|---|---|---|
| **2** | भवान् प्राचेतस्। स्वकाश्मीरयात्रायाः वर्णनं कुर्वतो मित्रं ऋतेशं प्रति लिखिते अस्मिन् पत्रे मञ्जूषातः पदानि चित्वा रिक्तस्थानानि सम्पूर्ण पत्रं पुनः लिखत। | **5** |
| | **77**, बादामी उद्यानम्<br>(1) ...............<br>प्रिय मित्र ऋतेश।<br>(2).....................<br>अत्र कुशलम् तत्रास्तु। भगवतः कृपया अद्य वयं सर्वे सकुशलं श्रीनगरं समागत। अस्माकं यात्रा अतीव (3).....................आसीत्। परह्यः रात्रौ दिल्लीतः 'जम्मू एक्सप्रैस' द्वारा प्राचलाम। (4)..............प्रातः जम्मूनगरं प्राप्य बसयानद्वारा श्रीनगरं प्रति प्राचलाम। सर्वत्र हरीतिमायाः साम्राज्यम् आसीत्। आकाशं तु (5) .................एवासीत्। प्रातः श्रीनगरे अस्माकं स्वागतं (6).....................एवाभवत्। अस्य प्रदेशस्य अद्भुत-सौन्दर्यं दृष्ट्वा वयम् विस्मिताः। सत्यम् यथाश्रुतम् तस्मादपि (7).............. अस्ति इदं प्रदेशम्। अस्माकं वासः लालचौकस्य समीपे एव (8) ..............यात्रिनिवासे अस्ति। अद्य विश्रामं कृत्वा श्वः एव कार्यक्रमानुसारम् प्रदेशस्य विभिन्न-दर्शनीयस्थानानाम् द्रष्टुम् गमिष्यामः। गृहे (9) .................मम प्रणामाः। अनुजाय च स्नेहम्।<br>तव मित्रम्<br>(10)....................<br><br>मञ्जूषा- एकस्मिन्, प्राचेतस्, हिमवृष्ट्या, ह्यः, सस्नेहं नमस्ते, दिल्लीतः, मातृपितृचरणयोः, सुन्दरतरम्, मेघैराच्छन्नम्, आनन्ददायिनी। | |
| **3** | प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानाम् सहायतया पञ्चवाक्यानि संस्कृतेन लिखत।<br><br>मञ्जूषा- पर्वतः, घटे, जलं, एकं, उद्यानस्य, चित्रं, वृक्षाः, बालिका, काकः,गृहम् प्रति, अस्ति, गच्छति। | **5** |

| | | |
|---|---|---|
| | अथवा<br>मञ्जूषायाम् प्रदत्तपदानाम् सहायतया 'मम कक्षा' इति विषयम् अधिकृत्य संस्कृतैः पञ्चवाक्यानि लिखत ।<br><br>मञ्जूषा – मित्राणि, अध्यापकाः, अध्यापिकाः, मम, प्रियः, छात्राः, श्यामफलकम्, कक्षा-कार्यम् , स्वच्छम्, प्रतिदिनम्, मित्रस्य नाम, नवमी कक्षा, आसन्दिकाः, आनन्दप्रदम्। | |
| **4** | अधोलिखितानि वाक्यानि संस्कृतभाषयाम् अनूद्यताम् । (केवलं प्रश्नपञ्चकम्) | **5** |
| | (1) वन में अनेक पशु रहते हैं।<br>(2) छात्र पुस्तक पढने के लिए पुस्तकालय जाते हैं।<br>(3) महिलाएँ सेवकों को वस्त्र देती हैं।<br>(4) सीता राम की पत्नी थी।<br>(5) हम सब वाटिका में गेंद से खेलते हैं।<br>(6) वृक्ष के नीचे साँप है। | |
| | पठितावबोधनम् | |
| **5** | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – | |
| | अतएव प्रकृतिरस्माभिः रक्षणीया।तेन च पर्यावरणम् रक्षितं भविष्यति।प्राचीनकाले लोकमङ्गलाशंसिनः ऋषयो वने निवसन्ति स्म।यतो हि वने एव सुरक्षितं पर्यावरणमुपलभ्यते स्म।विविधा विहगाः कलकूजितैस्तत्र श्रोत्ररसायनं ददति।<br>सरितो गिरिनिर्झराश्च अमृतस्वादु निर्मलं जलं प्रयच्छन्ति।वृक्षा लताश्च फलानि पुष्पाणि इन्धनकाष्ठानि च बाहुल्येन समुपहरन्ति।शीतलमन्दसुगन्धवनपवना औषधकल्पं प्राणवायुं वितरन्ति। | |
| | एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) | **1** |
| | (1) का रक्षणीया?<br>(2) प्राचीनकाले के वने निवसन्ति?<br>(3) विहगाः किम् ददति? | |
| | पूर्णवाक्येन उत्तरत– | **2** |
| | (1) के निर्मलं जलं प्रयच्छन्ति?<br>(2) वनपवना किम् वितरन्ति? | |
| **6** | अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – | |
| | स भग्नधन्वा विरथो हताश्वो हतसारथिः।<br>अङ्केनादाय वैदेहीं पपात भुवि रावणः।। | |
| | एकपदेन उत्तरत– | **1** |
| | (1) कः भुवि पपात?<br>(2) सः काम् आदाय भुवि पपात ? | |
| | पूर्णवाक्येन उत्तरत– | **2** |
| | (1) कीदृशः रावणः भुवि पपात? | |
| **7** | अधोलिखितं नाट्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – | |

| | | |
|---|---|---|
| | (ततः प्रविशति तपस्यारतः तपोदत्तः)<br>तपोदत्तः- अहमस्मि तपोदत्तः। बाल्ये पितृचरणैः क्लेशमानोऽपि विद्यां नाऽधीतवानस्मि।<br>तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्।<br>हा विधे। किमिदम्मया कृतम्? कीदृशी दुर्बुद्धिरासीत्तदा। एतदपि न चिन्तितं यत्-<br>परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।<br>नरो निर्मणिभोगीव सभायां यदि वा गृहे।। | |
| | एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) | 1 |
| | (1) तपोदत्तः कदा विद्यां न अधीतवान्?<br>(2) कीदृशः तपोदत्तः प्रविशति?<br>(3) तपोदत्तः कैः गर्हितः अभवत्? | |
| | पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) | 2 |
| | (1) कैः भूषितः अपि नरः न शोभते?<br>(2) कुत्र नरः न शोभते?<br>(3) कीदृशः नरः सभायां गृहे वा न शोभते? | |
| 8 | मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत- | 2 |
| | सा तदा करूणा वाचो विलपन्ती सुदुःखिता।<br>वनस्पतिगतं गृध्रं ददर्शायतलोचना।।<br>अन्वयः- तदा सा (1)..............करूणा वाचो (2)........... आयतलोचना (3)..............गृध्रं (4)..............।<br><br>मञ्जूषा- ददर्श, विलपन्ती, सुदःुखिता, वनस्पतिगतं, ।<br><br>अथवा<br><br>विना लिप्यक्षरज्ञानं तपोभिरेव केवलम्।<br>यदि विद्या वशे स्युस्ते सेतुरेष तथा मम।।<br><br>भावार्थः- यथा नरः लिपि (1)........... विना केवलम् (2)........... एव ते वशे विद्या (3).............. तथा मम (4).........सेतुः निर्माण प्रयासः।<br><br>मञ्जूषा- एषः, अक्षरज्ञानम्, स्युः, तपोभिः। | |
| 9 | अधोलिखितकथांशं समुचित-क्रमेण लिखत- | 4 |
| | (1) क्रीडितुम् तेन सह कोऽपि वयस्यः नासीत् ।<br>(2) अनन्तरं सः एकां चटकां न्यवेदयत्।<br>(3) बालः अचिन्तयत्- सर्वे स्वकार्याणि कर्तुम् दत्तचित्तः। अहमेव तन्द्रालुः अस्मि।<br>(4) कुक्कुरः अपि रक्षानियोजकार्ये संलग्नः आसीत्।<br>(5) एतेभ्यः नमः यैः मे तन्द्रालुतायाम् कुत्सा समापादिता।<br>(6) क्रीडनार्थम् सः सर्वप्रथमं कीटं आह्वयत्। | |

| | | |
|---|---|---|
| | (7) ततः सः बालः विद्याव्यसनी भूत्वा महतीं वैदुषीं प्रथां सम्पदं च लेभे।<br>(8) भ्रान्तः कश्चन बालः आसीत्। | |